दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् ज्येष्ठशुक्लचतुर्थी
आषाढः 04 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-236 | 1 | जून 18, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com



2 देहल्यां केंद्रीयमंत्रिणा खट्टरेण सह अमिलत् मुख्यमन्त्री सुक्खुः, विद्युत्-स्वाम्यधनस्य (रॉयल्टी) वर्धनम् इत्यादयः बहवः विषयाः उत्थापिताः

3 केन्द्रीय- संस्कृत- विश्वविद्यालयस्य, उत्तराखण्ड- संस्कृत- विश्वविद्यालयस्य संयुक्ततत्त्वावधाने हरिद्वारे एकविंशत-दिवसीयः संस्कृतशिक्षकप्रशिक्षणवर्गः समारब्धः

4 मेसिना भङ्क्तिः रोनाल्डो-वर्येण स्थापितः कीर्तिमानः, पादकन्दुक-विश्वचषके सर्वाधिक-गोलकर्ता क्रीडकः


## जी-7 इत्यस्य नेतारः वैश्विकस्थिरतां, सुरक्षा-सहकारं, बहुराष्ट्रिय-सङ्ङ्घठित-अपराधस्य प्रतिकार-प्रयत्नाञ्च केन्द्रीयमानाः घोषणानाम् श्रृङ्खलाः स्वीकृतवन्तः



जी 7 देशैः वैश्विक स्थिरतायाः, सुरक्षा-सहयोगस्य अथ सीमापार-सङ्घटित-अपराध-निवारणस्य उद्देश्येन विभिन्नाः प्रमुखाः घोषणाः विहिताः। मुख्यवक्तव्ये नेतृभिः अमरीका-ईरान-देशयोः मध्ये सञ्जातं संधिनिश्चयम् अभिनन्दितम्। सहैव होरमुज जलसंधौ सुरक्षित-समुद्रीय-परिवहनस्य महत्त्वं प्रतिपादितं, क्षेत्रीय-सुरक्षा-संवर्धनाय च समर्थनं प्रदत्तम् । अन्य-घोषणापत्रे, जी-7 देशैः मादकद्रव्यस्य अवैधकार्यं निरोद्धं सङ्कल्पो विहितः। अस्मिन् अभियाने ब्राजील-दक्षिणकोरिया देशौ अपि सहमतिं प्रदर्शितवन्तौ। अवैधमार्गान् रोद्धं 'जी-7 प्लस पोर्ट्स नेटवर्क' इति नव-मञ्चस्य प्रस्तावः दत्तः।

## आतङ्कवादं विरुध्य सर्जिकल स्ट्राइक्स, बालाकोट, आपरेशन् सिन्दुर इत्येतानि च निर्णायकानि कार्याणि आसन् - रक्षामंत्री राजनाथसिंहः

रक्षामंत्री राजनाथसिंहः अवदत् यत् भयोत्पादनं विरुध्य शून्य-सहिष्णुतायाः नीतिमनुसृत्य सर्जिकल्-स्ट्राइक्स्, बालाकोट्, आपरेशन् सिन्दूर् इत्यादीनि निर्णायक-कार्याणि यावत्, भारतदेशः स्पष्टम् सन्देशम् प्रेषितवान् यत् तस्य सम्प्रभुता निर्विवाद्या अस्ति । सामाजिक-प्रसार-माध्यमे श्रीसिङ्घः उल्लिखतवान् यत्, प्रधानमन्त्रिणः नरेन्द्रमोदिनः योग्य नेतृत्वे भारते राष्ट्रिय-सुरक्षा-संरचनायां ऐतिहासिक-परिवर्तनम् अभवदिति। सः इत्यपि अवदत् यत् रक्षाक्षेत्रे आत्मनिर्भरतायाः विषये देशस्य संकल्पेन स्वदेशीय क्षमता सुदृढा, सशस्त्र-बलानां आधुनिकीकरणं, भूमि-समुद्र-वायु-साइबर-अन्तरिक्ष-क्षेत्रेषु सज्जता च वर्धिता। रक्षामंत्री अधोरेखितवान् यत् गत द्वादश-वर्षाणां यात्रा दृढतरां, सुरक्षितां, आत्मनिर्भरां, आधिक्येन आत्मविश्वासयुताञ्च भारतमातरं प्रतिविम्बयति ।
भारतस्य रक्षोत्पादनं निवर्तमान वित्तीयवर्षे दशांश-सप्त-अष्टोत्तरैक-लक्षं कोटिरूप्यकाणि अभिलेख्यं यावत् वर्धितम्; विंशति-एकविंशतिः वर्षात् दशाधिकैकशत- प्रतिशतं वर्धितमस्ति ।
रक्षामंत्री राजनाथसिंहः अस्मिन् आर्थिकवर्षे भारतस्य वार्षिक-रक्षा-उत्पादनं सार्वकालिकं दशांश-सप्त-अष्टोत्तरैक-लक्षं कोटिरूप्यकाणि यावत् औन्नत्यं प्राप्नोदिति अवोचत्। सामाजिक-प्रसार-माध्यमे, श्रीसिङ्घः अकथयत् यत् एषा उल्लेखनीया उपलब्धिः पूर्वतनस्य वित्तीयवर्षस्य दशांश-पञ्च-चतुरुत्तरैक-लक्ष-कोटिरूप्यकाणां उत्पादनस्य अपेक्षया दशांशषड्उत्तर-पञ्चदश-प्रतिशतं यावत् प्रभावोत्पादिका वृद्धिः, विंशति-एकविंशतिः वित्तीय वर्षाच्च दशाधिकैकशत-प्रतिशतात्मिका अस्ति।

## प्रधानमन्त्रिणः नरेन्द्रमोदिनः अमरीका-राष्ट्रपतिना डोनल्ड ट्रम्पेन सह बहुप्रतीक्षिता द्विपक्षीय-वार्ता कृता



फ्रांस-देशस्य 'एवियन' नगरे चलायमाने जी-7 शिखरसम्मेलने प्रधानमन्त्री नरेन्द्रमोदी 'सर्वहितकारि-सतत-आर्थिक-विकासः' इत्याख्ये मुख्यविषये आयोजितायां महत्त्वपूर्णकार्यगोष्ठ्याम् भागं भजते । सत्रेऽस्मिन् जी-7 देशाः, सहभागी-राष्ट्राणि, अन्ताराष्ट्रिय-मुद्राकोषस्य ओ.ई.सी.डी. इत्यस्य च प्रतिनिधयः उपस्थिताः आसन्। अत्रावधेयं यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः अमरीका-राष्ट्रपतिना डोनल्ड ट्रम्पेन सह बहुप्रतीक्षिता द्विपक्षीय-वार्ता कृता । पंचविंशत्युत्तर-द्विसहस्रतमवर्षस्य फरवरीमासात् परं द्वयोः नेत्रोः इदं प्रथमं प्रत्यक्षतया सम्भाषणमस्ति । अमेरिका-ईरान-युद्धविरामस्य अथ होर्मुज-जलसंधेः पुनः उद्घाटनस्य पृष्ठभूमौ एषः संवादः अतीव महत्त्वपूर्णो वर्तते। उभौ नेतारौ द्विपक्षीय-व्यापार-संधिं समेत्य अतिरिक्तं वैश्विक समाह्वानानां समाधानाय चर्चा कृतवन्तौ । एतदतिरिच्य, प्रधानमन्त्री 'कृत्रिम बुद्धिमत्तायाः सुरक्षित-प्रभावी-उपयोगः इति विषमधिकृत्य कार्य-मध्याह्नभोजे अपि भागं ग्रहीष्यति, यत्र प्रमुख एआई-विपणीनां मुख्याधिकारिणः समुपस्थिताः भविष्यन्ति।

### प्रधानमन्त्री नरेन्द्रमोदी फ्रांस-देश-प्रवासस्य भागत्वेन पेरिस-नगरं प्राप्तवान्

प्रधानमन्त्री नरेन्द्रमोदी फ्रांस-देश-प्रवासस्य भागत्वेन अद्य सायं पेरिस-नगरं प्राप्तवान् । तत्रत्यः भारतीय-समुदायः तदीय-स्वागतार्थं महत् उत्साहेन सज्जो वर्तते। अद्य प्रधानमन्त्री प्रमुख-विपणीनां मुख्यकार्यकारिभिः सह चर्चा करिष्यति, या मध्याह्नपर्यन्तं प्रचलिष्यति । तदनन्तरं, सः यूरोप-महाद्वीपस्य प्रमुख-प्रौद्योगिकि मञ्चे 'विवा-टेक-शिखरसम्मेलने' भागं ग्रहीष्यति, तत्र च स्व-सम्बोधनं प्रदास्यति। सायं काले असौ एकस्मिन् सामुदायिक कार्यक्रमे भारतीय-प्रवासिभिः सह संवादं विधास्यति।

## विद्रोह-प्रतिरोध-कार्याणि अभिलक्ष्य रक्षाबलानि सम्पूर्णं मणिपुरे सजगाः सक्रियाश्च सन्ति; त्रयः आतंकवादिनः गृहीताः, षड्विंशतिश्च अवैध-अंतःभूमीयानि गुहा-स्थानानि नष्टानि

मणिपुरे सुरक्षाबलैः उग्रवाद-विरोधाभियानानि तीव्रीकृत्य त्रयः उग्रवादिनः निगडिताः सहैव षड्विंशति अवैध-भूमीयानि गुहास्थानानि विनष्टानि । आरक्षिबलानुगुणं, निगृहीताः उग्रवादिनः प्रतिबन्धित-सङ्घटनस्य 'पीपल्स लिबरेशन आर्मी' पी.एल.ए. इत्यस्य सक्रिय-सदस्याः सन्ति, ये पश्चिम-इम्फाल मण्डलात् गृहीताः। एते अनेकेषु हिंसाचार-अपराधेषु संलिप्ताः आसन्। अपरपक्षे, कामजोङ्-उखुल-मण्डलयोः सशस्त्र समूहैः उपयुज्यमानाः षड्विंशतिः अवैध-गुहास्थानानि ध्वस्तीकृतानि ।



## सुभाषितम्

**बुधाग्रे न गुणान् ब्रूयात्,**
**साधु वेत्ति यतः स्वयम्।**
**मूर्खाग्रेऽपि च न ब्रूयाद्,**
**बुधप्रोक्तं न वेत्ति सः।।**

अर्थात्- कभी भी अपने गुण किसी के सामने स्वयं नहीं प्रकट करने चाहिए क्योंकि किसी बुद्धिमान के सामने गुणों को कहने की आवश्यकता ही नहीं होती वह अपने स्वभाव से स्वयं जान लेते है, वैसे ही मूर्ख के सामने भी गुणों को नहीं कहना चाहिए क्योंकि कहने पर भी वे नहीं समझेंगे।


दैनिकम् ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263



सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्


## भारतेन कृतः अफगानिस्तान-दलस्य सम्मार्जनम् (सफाया), शुभमन-ईशानयोः शतकबलेन २-० इति अन्तरेण विजिता श्रृङ्खला



भारतेन लखनऊ-नगरे क्रीडिते द्वितीये एकदिवसीय-प्रतिस्पर्धायां (वनडे) अफगानिस्तान-दलं १७० धावनाङ्कैः (रन्) पराजित्य त्रयाणां स्पर्धानामं शृङ्खला स्वनाम्नि कृता। प्रथमं क्रीडन् भारतेन ४०२ धावनाङ्काः निर्मिताः। प्रत्युत्तरे अफगानिस्तान-दलम् ४४.३ ओवरेषु २३२ धावनाङ्केषु सर्वमपि क्रीडक (ऑलआउट) अहारयत्। शेषं ४ पृष्ठे

# देहल्यां केंद्रीयमंत्रिणा खट्टरेण सह अमिलत् मुख्यमन्त्री सुक्खुः, विद्युत्-स्वाम्यधनस्य (रॉयल्टी) वर्धनम् इत्यादयः बहवः विषयाः उत्थापिताः



**हिमसंस्कृतवार्ताः- शिमला।** नवदेहल्यां मङ्गलवासरे हिमाचलप्रदेशस्य मुख्यमन्त्री सुखविन्द्रसिंहसुक्खुः केंद्रीय- ऊर्जा- आवास- शहरीकार्यमन्त्री मनोहरलालखट्टरेण सह अमिलत्। अस्मिन् अवसरे सः हिमाचलप्रदेशेण सम्बद्धान् बहून् महत्त्वपूर्णान् विषयान् अधिकृत्य विस्तरेण चर्चां कृतवान्, यस्यां जलविद्युत्परियोजनासु निःशुल्कविद्युत्- स्वाम्यधनस्य (रॉयल्टी) भागवर्धनं, विभिन्नानां विकासपरियोजनानां कृते वित्तीयसहायता मुख्याः आसन्। जलविद्युत्परियोजनासु स्वाम्यधनस्य वर्धनाय आग्रहः मुख्यमन्त्री सुक्खुः केंद्रीयमन्त्रिणं प्रति आग्रहं कृतवान् यत् केंद्रीय- सार्वजनिकक्षेत्र- उपक्रमाणां जलविद्युत्परियोजनासु राज्येन प्राप्यमाणस्य निःशुल्कविद्युत्-स्वाम्यधनस्य भागः वर्धनीयः। सः विशेषरूपेण तासां परियोजनानां उल्लेखं कृतवान् यासाम् आरम्भिकद्वादशवर्षाणां (१२ वर्षाणाम्) अवधिः पूर्णा अभवत्। मुख्यमन्त्री अयाचत यत् तादृशीषु परियोजनासु राज्यस्मै सम्प्रति प्राप्यमाणस्य १२ प्रतिशतं (१२%) निःशुल्कविद्युतः अतिरिच्य स्वाम्यधने वृद्धिः भवेत्। अपि च, सः १८० मेगावाटक्षमतायुक्तस्य 'बैरा- स्यूल' जलविद्युत्परियोजनायाः ४४ वर्षाणां पूर्तेः सन्दर्भे राज्यस्य निःशुल्कविद्युद्भागं ५० प्रतिशतं (५०%) कर्तुम् अपि अनुरोधं कृतवान्। बीबीएमबी-परियोजनानाम् ऊर्जावशिष्टं (बकाया) शाननपरियोजनायाः विषयश्च अस्यां गोष्ठ्यां भाखड़ा ब्यास प्रबन्धन बोर्ड (बीबीएमबी) परियोजनाभिः सम्बद्धस्य ऊर्जावशिष्टधनस्य दाने जायमानस्य विलम्बस्य विषयः अपि उत्थापितः। मुख्यमन्त्री अवदत् यत् एतासां परियोजनानां निर्माणकाले राज्यस्य नागरिकाः विस्थापनस्य पर्यावरणीयप्रभावाणां च सम्मुखीकरणं कृतवन्तः। सः हरियाणा-पंजाबराज्ययोः सम्मत्या ३१ अक्तूबर २०११ पर्यन्तस्य १३,०६६ मिलियन यूनिट् ऊर्जावशिष्टस्य भुगतानं ६ प्रतिशतं (६%) व्याजेन सह कर्तुं मागं कृतवान्। मुख्यमन्त्री अवबोधितवान् यत् व्याजेन सह इयं राशिः सम्प्रति प्रायः ७,७८४ कोटिरूप्यकाणि भवति। एतदतिरिच्य, मुख्यमन्त्री शाननजलविद्युत्परियोजनायाम् अपि हिमाचलस्य वैध-अधिकाराणाम् पक्षं प्रस्तुतवान्।

## काङ्गड़ा-नगरे 'एयरो सिटी' तथा 'हिम चण्डीगढ़' इत्येतयोः कृते वित्तीयसहायता

मुख्यमन्त्री काङ्गडानगरे प्रस्तावितायाः 'एयरो सिटी' तथा 'हिम चण्डीगढ़' परियोजनायाः विकासाय केंद्रीयमन्त्रिणः सकाशात् वित्तीयसहायताम् अयाचत। सः न्यवेदयत् यत् राज्यसर्वकारेण 'अर्बन चैलेन्ज फण्ड' इत्यस्य अन्तर्गतं २४ शहरीयनिकायानां कृते १,१७९ कोटिरूप्यकाणां परियोजनाः प्रस्ताविताः सन्ति, यासु ६६० कोटिरूप्यकाणां परियोजनाः केंद्रसर्वकारं प्रति प्रेषिताः सन्ति। मुख्यमन्त्री 'क्लीन हिली एण्ड हिमालयन सिटीज इनिशिएटिव' इत्यस्य अन्तर्गतं १२.३३ कोटिरूप्यकाणि तथा च 'अमृत' योजनायाः अन्तर्गतं प्रलम्बितं ६४.४५ कोटिरूप्यकाणां राशिं मोक्तुम् अपि अनुरोधं कृतवान्। अस्यां महत्त्वपूर्णायां गोष्ठ्यां मुख्यमन्त्रिणा सह मुख्यसचिवः के. के. पन्तः, मुख्यमन्त्रिणः प्रधानपरामर्शदाता रामसुभगसिंहः, ऊर्जा-निदेशकः राकेश प्रजापतिः अपि उपस्थिताः आसन्। अनया मिलनया हिमाचलप्रदेशस्य विकासेन ऊर्जाक्षेत्रेण च सम्बद्धानां विषयाणाम् अग्रे सारणाय आशा वर्तते।

# सप्ताहभ्यन्तरे हिमाचलं प्राप्स्यति वर्षाकालः, १९ दिनाङ्कपर्यन्तं प्रचण्डवात-विद्युत्पात-वृष्टीनां 'नारङ्गसचेतना' प्रसारिता



**हिमसंस्कृतवार्ताः-** हिमाचलप्रदेशे एषु दिनेषु ऋतुचक्रस्य स्वभावः परिवर्तितः। राज्यस्य बहुषु क्षेत्रेषु जातया वृष्ट्या जनाः भीषणतापात् मुक्तिं प्राप्तवन्तः, अपरपक्षे तु करकापातः (ओलावृष्टिः) उद्यानपालकानां (बागबानों) कृषकाणां च चिन्तां वर्धयति। ऋतुविज्ञानविभागेन प्रदेशे १९ जून दिनाङ्कपर्यन्तं प्रचण्डवातस्य, विद्युत्पातस्य, वृष्टेश्च सचेतना प्रसारिता, यत्रैव १८ जून् दिनाङ्के पञ्चसु क्षेत्रेषु करकापातस्य सम्भावनां दृष्ट्वा नारङ्गसङ्केतः ज्ञापितः। बुधवासरात् पुनः ऋतुः परिवर्तनं नेष्यति। १८ जून दिनाङ्के वृष्टिकार्याणि सर्वाधिकं तीव्राणि भवितुं सम्भावना अस्ति। ऋतुविज्ञानविभागस्य पूर्वानुमानुसारं १७ जून् दिनाङ्के प्रदेशस्य विभिन्नेषु क्षेत्रेषु गर्जन-तडित्-सहितं प्रतिघण्टां ३० तः ४० किलोमीटरमितवेगेन प्रचण्डवायुः चलितुं शक्नोति। २० तथा २१ जून दिनाङ्कयोः ऋतुः अपेक्षाकृतं शान्तः भवितुं सम्भावना अस्ति। शिमला- स्थित-ऋतुविज्ञानकेन्द्रस्य वैज्ञानिकस्य सन्दीपशर्मणः अनुसारं वर्षाकालस्य (मानसून) प्रगतौ निरन्तरं दृष्टिः स्थापिता अस्ति। सामान्यरूपेण वर्षाकालः २२ जून् दिनाङ्कस्य समीपे शिमलां प्राप्नोति, यत्रैव २५ जून् दिनाङ्कपर्यन्तं सम्पूर्णं प्रदेशं व्याप्नोति। वर्तमानपरिस्थितीः दृष्ट्वा आगामिनि एकसप्ताहभ्यन्तरे वर्षाकालस्य प्रवेशस्य सम्भावना वर्तते।

## गोहर-क्षेत्रे सर्वाधिका वृष्टिः-

विगतेषु २४ होरासु सर्वाधिकं ४६ एम. एम. गोहर- क्षेत्रे, जोत- क्षेत्रे ४१, कुफरी-क्षेत्रे ३९.६, नगरोटा- क्षेत्रे ३५.6, मुरारीदेव्यां ३१.५, पच्छाद-क्षेत्रे २४, ओलिंडा-क्षेत्रे २३.४, शिलारू-क्षेत्रे १८.८, सुन्दरनगरे १७.९, काङ्गड़ा-क्षेत्रे १६.४ एम.एम. वृष्टिः अङ्किता।

## करकापातेन सस्यानां हानिः-

वृष्टिकाले शिमला, जुब्बड़हट्टी, काङ्गड़ा, सुन्दरनगरं, कुफरी, जोत तथा मुरारीदेवी इत्येतेषु स्थानेषु मेघगर्जनं तडित् च अङ्कितम्। शिमला, रामपुरं, चौपालः, किन्नौरः तथा मण्ड्याः केषुचित् क्षेत्रेषु करकापातस्य घटनाः सम्मुखीभूताः। शिमलायाः उपरिभागेषु जातेन करकापातेन सेबफलानि, कलायः (मटर) च समाविश्य शाकानां फलानां च महती हानिः अभवत्।

# ओमान-देशातः सप्तदिनानन्तरं भारतं प्राप्तं आदित्यस्य पार्थिवशरीरम्, एकमात्रपुत्रस्य अन्तिमावलोकनाय व्याकुलः परिवारः

**हिमसंस्कृतवार्ताः- हमीरपुरम्।** ओमान-देशे क्षेपणास्त्र-आक्रमणे प्राणानाम् आहुतिं दत्तवतः आदित्यशर्मणः पार्थिवं शरीरं सप्तदिनानां पश्चात् भारतं प्राप्तम्। बुधवासरे प्रातः नवदेहल्याः इन्दिरागान्धी- अन्तर्राष्ट्रिय- विमानपत्तने देहः आनीतः। ततः सम्बद्ध-विमानेन पार्थिवशरीरं चण्डीगढं प्रति प्रेषितम्। चण्डीगढतः सायं ४:२० वादने रुग्णवाहिन्या (एम्बुलेंस) पार्थिवदेहः हमीरपुरं प्रति प्रेषितः। परिवारस्य क्षेत्रस्य च जनाः अधीरतया अन्तिमदर्शनाय प्रतीक्षां कुर्वन्तः सन्ति। एकमात्रपुत्रस्य अन्तिमावलोकनाय परिवारः व्याकुलः वर्तते।'शिपिंग कॉरपोरेशन' इति संस्थया प्रेषितया रुग्णवाहिन्या चण्डीगढतः पार्थिवशरीरं हमीरपुरस्य डॉ. राधाकृष्णन- राजकीय- आयुर्विज्ञान- महाविद्यालयं चिकित्सालयं च प्राप्नोति। अत्र वैधानिकप्रक्रियानुसारं आवश्यकाः औपचारिकताः अन्वेषणानि च पूरिष्यन्ते। तदनन्तरं पार्थिवदेहः अन्त्येष्टिसंस्काराय आत्मीयेभ्यः (परिजनेभ्यः) समर्पयिष्यते।

## चण्डीगढं प्राप्ताः आसन् बान्धवाः-

आदित्यशर्मणः निकटवर्तिनः बान्धवाः तस्य पितृव्यः च पार्थिवशरीरं ग्रहीतुं पूर्वमेव चण्डीगढं प्रति प्रस्थिताः आसन्। परिवारस्य अन्ये सदस्याः बान्धवाः च निरन्तरं सम्पर्के सन्ति, गृहे च शोकव्याकुलं वातावरणं निर्मितं वर्तते।

## बृहस्पतिवासरे भविष्यति अन्त्येष्टिसंस्कारः

सूचनानुसारं बृहस्पतिवासरे आदित्यशर्मणः अन्त्येष्टिसंस्कारः पूर्णतया हिन्दू- रीति- नीति- अनुसारं विधास्यते। अनया दुःखदघटनया क्षेत्रे शोकस्य तरङ्गः अस्ति, स्थानीयजनाः अपि परिवारं प्रति संवेदनां प्रकटयन्ति। परिजनाः अद्यापि गम्भीर- आघाते सन्ति, स्वप्रियजनस्य अन्तिमदर्शनाय च प्रतीक्षन्ते।



# केन्द्रीय- संस्कृत- विश्वविद्यालयस्य, उत्तराखण्ड- संस्कृत- विश्वविद्यालयस्य संयुक्ततत्त्वावधाने हरिद्वारे एकविंशतदिवसीयः संस्कृतशिक्षकप्रशिक्षणवर्गः समारब्धः



**(हिमसंस्कृतवार्ताः- प्रवेशकुमारशुक्लः, शिवमत्रिपाठी, हरिद्वारम्)** उत्तराखण्ड- संस्कृत- विश्वविद्यालये हरिद्वारे एकविंशतदिवसीयः संस्कृतशिक्षकप्रशिक्षणवर्गः समारब्धः। ज्येष्ठशुक्लप्रतिपदारभ्य आषाढ- कृष्ण- सप्तमीपर्यन्तम् (१५ जूनतः ७ जुलाई २०२६ पर्यन्तम्) प्रचलिष्यति अस्य प्रशिक्षणवर्गस्य मुख्योद्देश्यं संस्कृतशिक्षणस्य गुणवत्तावर्धनमध्यापनकौशलस्य परिष्कारः, शिक्षणप्रक्रियायां नवदृष्टेः समावेशः तथा कुशलसंस्कृतशिक्षकनिर्माणं च वर्तते। कार्यक्रमस्य शुभारम्भः वैदिकमङ्गलपाठेन वाग्देव्याः समर्चनेन च सम्पन्नः। तदनन्तरं दीपप्रज्वलनपूर्वकम् उद्घाटनसत्रस्यौपचारिकसत्रम् आरब्धम्। प्रास्ताविकभाषणे डॉ. विश्वजित्प्रामाणिकमहोदयाः संस्कृताध्ययनकेन्द्रस्य कार्यपरिकल्पनां, प्रशिक्षणवर्गस्य प्रयोजनं तथा भावीकार्यदिशां च सम्यक् प्रतिपादितवन्तः। उद्घाटनसत्रस्य अध्यक्षतां वहन्तः मुक्तस्वाध्यायपीठस्य निदेशकाः प्रो. रत्नमोहनझामहोदयाः स्वीयाध्यक्षीयोद्बोधने अवदन् यत् शिक्षकस्य जीवनं समाजस्य मार्गदर्शकरूपेण परिगण्यते। आदर्शशिक्षकः विद्यानिष्ठः, चरित्रसम्पन्नः, अनुशासनशीलः, कर्तव्यपरायणः, विद्यार्थिहितरतश्च भवितुमर्हति। शिक्षणकार्यं केवलं ज्ञानसंप्रेषणस्य साधनं न, अपि तु संस्कारनिर्माणस्य तथा व्यक्तित्वविकासस्य आधारभूतप्रक्रियेति तैः प्रतिपादितम्।मुख्यातिथिरूपेण उपस्थिताः उत्तराखण्डशासनस्य संस्कृतशिक्षासचिवाः दीपककुमारगैरोलामहोदयाः संस्कृतभाषायाः गौरवं महत्त्वं च विवेचयन्तः उक्तवन्तः यत् संस्कृतं भारतीयसंस्कृतेः प्राणतत्त्वम् वर्तते। अस्यां भाषायां निहितं ज्ञानवैभवं मानवसमाजस्य अमूल्यधरोहररूपेण विद्यते। संस्कृतस्य संरक्षणं, संवर्धनं च सांस्कृतिकस्वाभिमानस्य दृढीकरणाय अत्यावश्यकमिति तैः प्रतिपादितम्। कार्यक्रमे सन्निधिः कुर्वन्तः उत्तराखण्ड- संस्कृत- विश्वविद्यालयस्य कुलपतयः प्रो. रमाकान्तपाण्डेयमहोदयाः प्रशिक्षणवर्गस्य उपादेयताम् अवदन् यत् युगानुरूपशिक्षणपद्धतीनां ज्ञानं तथा अध्यापनदक्षतायाः अभिवृद्धिः शिक्षकेभ्यः अनिवार्या विद्यते। एतादृशाः प्रशिक्षणवर्गाः शिक्षकेषु व्यावसायिक-दक्षतामात्मविश्वासं तथा शैक्षिकप्रतिबद्धतां वर्धयन्ति इति तैः प्रतिपादम्।
सारस्वतातिथिरूपेण उपस्थिताः उत्तराखण्ड आयुर्वेद विश्वविद्यालयस्य कुलपतिचराः प्रो. सुनीलकुमारजोशिमहोदयाः संस्कृतभाषायाः वैज्ञानिकस्वरूपं, सार्वभौमिकप्रासङ्गिकतां, मूल्यपरकजीवननिर्माणे च तस्याः योगदानं विशदयन्तः अवदन् यत् संस्कृतं न केवलं भाषारूपेण, अपि तु जीवनदर्शनरूपेण अपि मानवसमाजं दिशानिर्देशं करोति। आदर्शशिक्षकः स्वाचरणेन विद्यार्थीन् प्रेरयन् समाजे सद्भावनां, नैतिकमूल्यानि तथा कर्तव्यबोधं च प्रतिष्ठापयतीति तैः अभिमतम्। कार्यक्रमस्य कुशलसञ्चालनं प्रो. अरविन्दनारायणमिश्रमहोदयाः अकुर्वन्। अन्ते उत्तराखण्ड- संस्कृत- विश्वविद्यालयस्य कुलसचिवः दिनेशकुमारमहोदयः समागतानां सर्वेषामतिथीनां, विद्वज्जनानां, प्रशिक्षकाणां, प्रतिभागिनां कृतज्ञतां प्रकटयन् धन्यवादज्ञापनमकरोत्। प्रशिक्षकाः रोशनमहोदयः, काथरुपाः, पियालीसाश्मल, नाडूगोपालः, बप्पादासः सागरचौधरी, पिंकीदोलई, विष्णुप्रियामहोदयाः पलकमहोदयाः तत्रोपस्थिता आसन्। शान्तिमन्त्रस्य सस्वरपाठेन उद्घाटनसत्रस्य सम्पूर्तसत्रमभवत्।

# गाजोल-महाविद्यालये महाकविकालिदासजयन्ती समारोहेण पालिता





**हिमसंस्कृतवार्ता डॉ. निशिकान्तपाण्डेयः।**
गत-मङ्गलवासरे गाजोल-महाविद्यालयस्य बाङ्ला-विभागस्य संस्कृत-विभागस्य च संयुक्तप्रयासेन महाकविकालिदासजयन्ती महता समारोहेण पालिता। महाविद्यालयस्य प्रेक्षागृहे आयोजिते अस्मिन् कार्यक्रमे छात्राः, छात्र्यः, अध्यापकाः, अध्यापिकाः तथा संस्कृतिप्रेमिणः जनाः बहुसंख्यया उपस्थिताः आसन्।कार्यक्रमस्य शुभारम्भः दीपप्रज्वलनेन अभवत्। ततः सरस्वतीवन्दनया औपचारिककार्यक्रमस्य प्रारम्भः कृतः। उपस्थितैः अतिथिभिः अध्यापकैश्च महाकविकालिदासस्य साहित्यसाधना, संस्कृतभाषायाः उन्नयने तस्य योगदानं तथा भारतीयसंस्कृतौ तस्य महत्त्वं स्मारितम्।स्वागतभाषणं बाङ्ला-विभागस्य विभागाध्यक्षः डॉ. अमरचन्द्रकर्मकार-महोदयः अकरोत्। स्वीयभाषणे सः कालिदासस्य साहित्यकृतिनां सार्वकालिकमहत्त्वं तथा अद्यतनपीढ्यां तासां प्रासङ्गिकतां विवृतवान्। अनन्तरं महाविद्यालयस्य पूर्वतनकार्यवाहकाध्यक्षा डॉ. तन्मयसर्कार-महोदयः तथा अध्यापकपरिषदः सम्पादकः डॉ. निरङ्कुशचक्रवर्ती-महोदयः अपि स्ववक्तव्यानि प्रस्तुतवन्तः। प्रधानवक्ता तथा महाविद्यालयस्य अध्यक्षा महोदयः कालिदासस्य काव्येषु, नाटकेषु तथा संस्कृतसाहित्ये तस्य अमरावदानस्य विविधपक्षान् विस्तरेण निरूपितवान्।सांस्कृतिकपर्वणि पल्लवीघोष-महोदयया प्रस्तुतं सरस्वतीवन्दनं तथा “कालिदास जने जने” इति गीतं सर्वेषां हृदयानि जितवत्। तस्याः सुमधुरा प्रस्तुति कार्यक्रमस्य शोभां वर्धितवती।कार्यक्रमस्य प्रमुखाकर्षणम् आसीत् गौडबङ्गविश्वविद्यालयस्य संस्कृतविभागस्य प्राध्यापकः डॉ. अनिन्द्यचौधुरी-महोदयस्य विशिष्टं भाषणम्। तेन महाकविकालिदासस्य साहित्यचिन्तनम्, नन्दनतत्त्वम्, भारतीयपरम्परायाः सह तस्य गाढसम्बन्धः च सम्यक् विवेचितः। विशेषतः तेन कालिदासस्य नाटकेषु कृषिविज्ञानस्य विविधपक्षाः प्रकाशिताḥ। तस्य तथ्यसमृद्धं प्राञ्जलं च भाषणं उपस्थितैः विशेषरूपेण प्रशंसितम्।समग्रे कार्यक्रमे महाविद्यालयस्य विविधविभागानां अध्यापकाः, अध्यापिकाः, शिक्षाकर्मिणः तथा बहुसंख्यकाः छात्रछात्र्यः उत्साहेन सहभागित्वम् अकुर्वन्। उत्सवमुखरे वातावरणे सम्पन्ना एषा जयन्ती भारतीयसंस्कृतेः तथा साहित्यचर्चायाः संवर्धने महत्त्वपूर्णं योगदानं दत्तवती।कार्यक्रमस्य सञ्चालनं संस्कृतविभागस्य अध्यापकः डॉ. अनिमेषमण्डल-महोदयः कुशलतया अकरोत्। अन्ते आयोजकैः सर्वेभ्यः अतिथिभ्यः, अध्यापकाध्यापिकाभ्यः तथा छात्रछात्रीभ्यः धन्यवादाः ज्ञापिताः। उपस्थितैः सर्वैः अभिप्रेतं यत् एषा प्रथमवारं पालिता कालिदासजयन्ती गाजोल-महाविद्यालयस्य इतिहासे स्मरणीयमध्यायत्वेन स्थास्यति।



हिमसंस्कृतवार्ता
असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

## नामधातु-परिचयः -०४

उत्कटेच्छायां सर्वप्रातिपदिकानां क्यच्-प्रत्यये लालसायां सुक्, असुक् च आगमौ भवतः। सुगागमे चेत्, यथा -
बालः क्षीरस्यति - अर्थात् बालः क्षीरस्य लालसां करोति । अत्र 'क्षीरस्य' इति नामधातुः । एवमेव, अतिथिः दधिष्यति । बालिका मधुष्यति । असुगागमे चेत्, यथा -अतिथिः दध्यस्यति । दधि+अस्+य = दध्यस्य । ततः दध्यस्यति इति ।
वृषभः लवणस्यति । रमेशः मध्वस्यति ।
पूजाद्यर्थे यथा -नमस् - नमस्यति । केशवः गणपतिं नमस्यति ।परिचर्यार्थे यथा -वरिवस् - वरिवस्यति । पुत्रः मातरं वरिवस्यति ।
आश्चर्यकार्यार्थे यथा -चित्रङ् - चित्रीयते ।
क्यच्-प्रत्ययस्य अपराणि कानिचन उदाहरणानि । यथा -गार्ग्य+क्यच् - गार्गी+य - गार्गीयति ।
वात्स्य+क्यच् - वात्सीयति ।
कवि+क्यच् - कवीयति । अर्थात् कविम् इव आचरति मूर्खम् । एवं, नदी+क्यच् - नदीयति । विष्णुम् इव आचरति ब्राह्मणम् - विष्णूयति ।गुरुम् इव आचरति विप्रम् - गुरूयति । अत्र इ/ई/उ/ऊ-काराः दिर्घाः भवन्ति। एवमेव ऋकारस्य स्थाने रीङ् - री वा भवति । यथा - मातृ+क्यच् - मात्+री+य - मात्रीय ।एषा मातरम् इव आचरति - एषा मात्रीयति इति । (क्रमशः)

# भारत-ब्रिटेन देशयोः व्यापक-आर्थिक-व्यापार-सन्धिः (सीईटीए) जुलाई-मासस्य १५ दिनाङ्कात् प्रभावी भविष्यति, प्रधानमन्त्रिणा मोदिना व्यापारे नूतन-गतेः आशा व्यक्ता



भारत-ब्रिटेन देशयोः मध्ये व्यापकः आर्थिकः व्यापारिकः च सन्धिः (सीईटीए) जुलाई-मासस्य १५ दिनाङ्कात् आरभ्य लागू भविष्यति। अनेन सहैव सामाजिकसुरक्षया सम्बद्धः 'डबल कंट्रीब्यूशन कन्वेंशन' (द्विगुण-अंशदान-अभिसमयः) अपि प्रभावी भविष्यति। वाणिज्य-उद्योगमन्त्री पीयूषगोयलः अवदत् यत् अनया सन्धिना भारतीय-निर्यातस्य महत् लाभं भविष्यति। भारतेन ब्रिटेन-देशस्य आपणेषु (बाज़ारेषु) ९९ प्रतिशतं वस्तुषु सद्यः शुल्कमुक्त-प्रवेशः प्राप्स्यते। अनेन वस्त्र-चर्म-सामुद्रिकोत्पाद-अभियान्त्रिकी (इंजीनियरिंग)-प्रसंस्कृतखाद्यक्षेत्रेभ्यः विशेषः लाभः भविष्यति।प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् भारत-ब्रिटेन देशयोः मध्ये व्यापक-आर्थिक-व्यापार-सम्झौता (सीईटीए) जुलाई-मासस्य १५ दिनाङ्कात् प्रभावी भूत्वा उभयोः देशयोः व्यापारं निवेशं च प्रति नूतनां गतिं प्रदास्यति।सामाजिक-माध्यमे (सोशल मीडिया) एकस्मिन् सन्देशे प्रधानमन्त्रिणा कथितं यत् अनेन सम्झौतेन भारतीयकृषकाणाम्, श्रमिकाणाम्, सूक्ष्म-लघु-मध्यम-उद्यमानां (एमएसएमई), स्टार्टअप्स-नवोन्मेष (नवाचार)-क्षेत्राणां च कृते अनेके नूतनाः अवसराः प्राप्स्यन्ते। सः अपि अवदत् यत् एषः सम्झौता 'विकसितभारतम्-२०४७' इति लक्ष्यस्य प्राप्तौ महत्वपूर्णं योगदानं दास्यति।

## लौकिकन्यायकोशः (१२) आशामोदकतृप्तन्यायः

आशारूपिणः मोदकान् खादित्वा अतीव आनन्दः प्राप्तः इति काल्पनिकेन आनन्देन मानवः आशया जीवति। अग्रे मधुरं लभ्येत अनुकूलाः दिवसाः भविष्यन्ति संकटस्य दिनानि शाश्वतानि न भवन्ति इति अनया आशया सः जीवति। सः मधुरे स्वप्नमये भाविकाले विहरति। एतादृशस्य मनुष्यस्य वर्णनम् अनेन न्यायेन क्रियते। द्रष्टव्यम्- "आशामोदकतृप्ता ये ये चोपार्जितमोदकाः।
रसवीर्यविपाकादितुल्यं तेषां प्रसज्यते।।" (न्यायकन्दली)

**डा. वर्षा प्रकाश टोणगांवकर, पुणे, महाराष्ट्रम्**

## भूतपूर्व-पुलिसमहानिदेशकेन मुख्यमन्त्रिणे पत्रं लिखित्वा आरक्षकबलस्य भूमिकायाम् उत्थापिताः प्रश्नाः

**हिमसंस्कृतवार्ताः — शिमला ।** हिमाचलप्रदेशस्य एकेन सेवानिवृत्तेन आई.पी.एस.-अधिकारिणा भूतपूर्व-पुलिसमहानिदेशकेन विनोदधवेन मुख्यमन्त्रिणे सुखविन्दरसिंहसुक्खूवर्याय पत्रं लिखित्वा आरक्षकबलस्य (आरक्षकाणाम्) भूमिकायाम् आक्षेपाः कृताः। धवेन मुख्यमन्त्रिणे एकं मुक्तपत्रं (खुला पत्र ) लिखित्वा तस्य ध्यानं साम्प्रतिकीं कांचन गोलिकाकाण्डस्य (गोलीबारी) घटनां प्रति आकृष्टम्। अस्मिन् कथितं यत् यदि पीडितपक्षतः समये कृतानां अभियोगानां (शिकायतों) तथा च ११२-सहायताशृङ्खलायाम् (हेल्पलाइन) प्राप्तानां सूचनानां गाम्भीर्येण संज्ञानं गृहीतं स्यात्, तर्हि एषा घटना निवारयितुं शक्यते स्म। सः अवदत् यत् जनता केवलम् अपराधिनां ग्रहणं (गिरफ्तारी) न, अपितु अपराधस्य निरोधाय प्रभाविनः कार्यप्रक्रमस्य अपेक्षां रक्षति। धवनेन आशा प्रकटीकृता यत् राज्यसर्वकारः एताः चिन्ताः गाम्भीर्येण स्वीकरिष्यति। पत्रस्य अन्ते इयं सचेतना अपि दत्ता यत् यदि एतेषु विषयेषु समये गम्भीराणि पदक्षेपाणि न गृह्यन्ते—तर्हि नागरिकेभ्यः उपलवब्धेषु सांविधानिकेषु न्यायिकेषु च विकल्पेषु आश्रयः ग्रहीतव्यः भवितुं शक्नोति। अनेन जनविश्वासस्य सुदृढीकरणाय आवश्यकाः क्रमाः गृह्यन्ते।धवनेन बुधवासरे प्रसारिते वक्तव्ये नियम-व्यवस्थायाः (कानून-व्यवस्था) स्थितौ प्रश्नचिह्नं स्थापयता आरक्षकबलस्य न्यूनता प्रकटीकृता। सः अवदत् यत् आरक्षकाणां इतर-कार्येषु विनियोजनं तथा च प्रशासनिकनिर्णयेषु पारदर्शितायाः अभावः न्याय्यः नास्ति। सः अकथयत् यत् प्रदेशस्य आर्थिकस्थितौ सर्वकारस्य चिन्तायाः सत्यपि, उच्चकार्यालयमण्डनाय (सौंदर्यीकरणाय) तथा च अनावश्यकव्ययेभ्यः जनमानसे प्रश्नानाम् उद्भवः स्वाभाविकः अस्ति। सः अवदत् यत् आरक्षक-नियुक्ति-परीक्षायाः प्रश्नपत्र-प्रस्रवण-प्रकरणं (पेपर लीक मामला) अद्यापि जनतायाः मनसि कश्चन महान् प्रश्नः वर्तते। भूतपूर्व-डी.आई.जी. महोदयेन मुख्यमन्त्री नियम-व्यवस्थायाः, आरक्षक-प्रशासनस्य, आरक्षकविभागे सूचनाधिकार-व्यवस्थायाः (RTI) च असमीचीनतायाः निष्पक्षां समीक्षां कर्तुम् अग्रहः कृतः। सः सार्वजनिक-संस्थानां कार्यप्रणाल्याः अपि निष्पक्षपरीक्षणं अयाचत। सः अलिखत् यत् लोकतन्त्रे संस्थाः कस्मादपि व्यक्तेः अपि महत्तरः भवन्ति।

## मेसिना भङ्गितः रोनाल्डो-वर्येण स्थापितः कीर्तिमानः, पादकन्दुक-विश्वचषके सर्वाधिक-गोलकर्ता क्रीडकः



अर्जेन्टीना देशस्य प्रसिद्धः पादकन्दुक-क्रीडकः लियोनेल मेसिः बुधवासरे पादकन्दुक-विश्वचषके पुर्तगाल देशस्य क्रिस्टियानो रोनाल्डो-वर्यस्य कीर्तिमानं (रिकॉर्ड) अभङ्क्षीत्। अल्जीरिया देशस्य विरुद्धं तेन त्रयः (३) गोलाः कृताः। अधुना सः पादकन्दुक-विश्वचषके हैट्रिक (त्रिवारं क्रमेण गोल) कर्ता वरिष्ठतमः (सर्वाधिक-आयुष्कः) क्रीडकः अभवत्। विश्वचषके मेसि-वर्यस्य एषा प्रथमा हैट्रिक-अपि अस्ति। रोनाल्डो-वर्येण २०१८ तमे वर्षे विश्वचषके ३३ वर्षायुषि रूस देशस्य विरुद्धं हैट्रिक-गोलाः कृताः आसन्। अधुना मेसिना ३८ वर्षायुषि एतादृशं कृत्वा रोनाल्डो-वर्यस्य कीर्तिमानः भङ्गितः। मेसि-वर्यस्य एषा हैट्रिक एकस्मिन् विशिष्टे अवसरे आगता। तेन २००६ तमे वर्षे जून-मासस्य १७ दिनाङ्के एव फीफा-विश्वचषके स्वस्य प्रथमः प्रतियोगिता-मैचः क्रीडितः आसीत्। ३८ वर्षीयः मेसिः अल्जीरिया देशस्य विरुद्धं १७ तमे, ६० तमे, ७६ तमे च निमेषे (मिनट) गोलं चकार। सः ७८ निमेषाणाम् अनन्तरं क्रीडाङ्गणाह् (मैदान) बहिः अगच्छत्। मेसि-वर्यस्य अनेन उत्कृष्ट-प्रदर्शनेन अर्जेन्टीना देशेन 'ग्रुप-जे' इत्यस्य प्रतिस्पर्धायां अल्जीरिया देशः ३-० इति अन्तरेण पराजितः। मेसिः अधुना यावत् ११ अन्तर्राष्ट्रिय-हैट्रिक कृतवान् अस्ति। एषा क्रीडा अमेरिका देशस्य कैनसस नगरस्य 'एरोहेड' क्रीडाङ्गणे (स्टेडियम) अभवत्।



दारविश रसूली क्षत-कारणात् (चोट) क्रीडाङ्गणं त्यक्तवान् (रिटायर्ड हर्ट) पुनः च क्रीडितुं न प्रत्यागतवान्।भारतपक्षतः अधिनायकेन (कप्तान) शुभमन गिलेन १५४ धावनाङ्कानां तथा ईशान किशनेन १२५ धावनाङ्कानां शतकीय-क्रीडा प्रदर्शिता। उभाभ्यां तृतीय-क्रीडक-स्थानस्य (विकेट) कृते २२४ धावनाङ्काः संमिश्र्य दलं ४०० सङ्ख्यायाः पारं नेतुं महती भूमिका निर्वर्तिता। कन्दुक-क्षेपणे (गेंदबाजी) अर्शदीप सिंहेन गुरनूर बरारेण च ३-३ क्रीडकाः निष्कासिताः (विकेट झटके)। अफगानिस्तान-दलस्य पक्षतः रहमत शाहेन सर्वाधिकः ७९ धावनाङ्काः रचिताः।

**हिमसंस्कृतवार्ताः , ईदरधीरजः,हैदराबादः**

## वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये। लक्ष्मणपुरे एकेन छद्म-आरक्षकाधिकारिणा चायविक्रेतुः चत्वारिंशद्- रुप्यकाणां देयं न दत्तम्, अपि तु आरक्षकाणां पुरतः आदरः एव याचितः। तस्य एतादृशं दौर्जन्यं दृष्ट्वा वास्तविकैः आरक्षकैः सः निगृहीतः।

**काव्या-** नमस्ते नन्दिनि। चत्वारिंशद्-रुप्यकाणां देयस्य कृते तेन या मूर्खता कृता, सा अतीव हास्यास्पदा वर्तते। इदानीम् आस्ट्रेलियादेशात् विचित्रा वार्ता प्राप्ता। तत्र लक्षं तैलपायिकानाम् अवैधसङ्ग्रहं कुर्वन् कश्चित् तैलपायिका-राजः अधिकारिभिः निगृहीतः। एतावान् तैलपायिकानां सङ्ग्रहः पूर्वं कदापि न दृष्टः।

**नन्दिनी-** आम् काव्ये, लक्षं तैलपायिकाभिः सह तेन कथं वासः कृतः इति चिन्तनीयम् एव। अस्तु, इदानीं नौका-विषयिणी वार्ता। पुरा मनुना यादृशी महा-नौका निर्मिता, तादृशी एव एका नौका केण्टकी-प्रान्ते एकेन क्रैस्तव-सङ्घेन निर्मिता। किन्तु अतिवृष्ट्या तस्याः नौकायाः मार्गः क्षतिग्रस्तः कृतः। अतः तेन धन-क्षति-पूर्तये सुरक्षासंस्था न्यायालयं नीता। यया नौकया जलप्रलयात् रक्षणं प्रतिश्रुतं, तस्याः एव मार्गस्य रक्षणाय सुरक्षा-याचना कृता इति एषः महान् सोल्लुण्ठः!

**काव्या-** सत्यं वदसि। जलप्रलय-रक्षिका नौका अपि वृष्ट्या बाधिता इति सोल्लुण्ठः अतीव रुचिरः। मनुना अपि एतादृशी स्थितिः कदापि न कल्पिता। इदानीं तन्त्रज्ञान-जगतः वार्ता। फेसबुक-संस्थायाः स्वामी मार्क-जकरबर्गः स्वकीयान् कर्मचारिणः आदिष्टवान् अस्ति यत् ते पुनः प्रमोदमारभेयुः इति। तेन संस्थायाः अष्टसहस्रं कर्मचारिणः कार्येभ्यः निष्कासिताः। अनन्तरं शिष्टेभ्यः कर्मचारिभ्यः एषा नूतना आज्ञा दत्ता। किन्तु कर्मचारिभिः अस्य आदेशस्य तीव्रः विरोधः कृतः।